गिरिधरविरचितं
गञ्जीफाखेलनम् ।

गिरो वरोऽसौ कवितां स्वपद्यैरितीरयत्यल्पितकष्टभारा ।
धर्मस्य बाला तवकस्त्वनेन रसोद्गमः श्रीपरितोषणाय ॥ १ ॥
गञ्जीफाभिधखेलनं तु दिवसे सूर्यान्निशीन्दोर्भवे-
त्पत्राण्येककजातिजानि रविसंख्यान्याढ्यचित्राणि च ।
तज्जात्यष्टकमेवमग्रगदितं नामात्र यन्मोहरे-
त्यर्केशं किल रूपसंज्ञमिति यत्स्यात्तत्तु चन्द्रेश्वरम् ॥ २ ॥
चतुर्भिर्वा विद्धिस्त्रिभिरथ च खेलक्रमविधिः
सुखार्थं चित्तस्य क्रियत इह कालक्रमणकृत् ;
कथं कार्यः सोऽपि प्रथममथ पत्राणि सकला-
न्यधश्चित्राण्यत्र त्यजतु स तु कश्चिन्नरवरः ॥ ३ ॥
एकत्र पत्राणि करोतु कश्चिन्नरोऽनुमानादपरोऽत्र भागम् ।
शेषं च भागं च तदभ्रमर्त्यो विभज्य दत्ते निजदक्षमर्त्यात् ॥ ४ ॥

यथा च—

चित्रं त्वेकत एव पत्रनिकरे पत्राण्यधश्चित्रिता-
न्यज्ञात्वैव यथातथं मुहुरितश्चत्वारि तेभ्यो ददौ ।
चत्वारो यदि मानवा जिनमितानि स्युस्तदाथ त्रय
श्चेत्स्युर्दन्तमितानि च प्रतिनरं पत्राणि सर्वत्र च ॥ ५ ॥

अथ पत्रविभागकर्तुर्नरस्य प्रशंसामाह—

सर्वत्र भागं समतां नयंस्त्वं प्रयासि चोच्चं पदमत्र मित्र ।
एवं तुलादण्डविवेकमेकस्त्वमेव धन्यः कुरुषे युगेऽस्मिन् ॥ ६ ॥
रजनीदिनयोर्दिवाकरः समभागो तुलयाऽपि संगतः ।
रजनीमनुरञ्जयत्यतः किल नीचत्वमगाद्विभाकरः ॥ ७ ॥

अथ खेलः—

दिनेऽर्कं परं पत्रमेकं गृहीत्वा प्रयातीन्दुरेवं निशि प्रायशोऽत्र ।
महान्तो यतो यत्र कुत्रापि कार्ये कमप्येकमादाय गच्छन्ति चान्यम् ॥ ८ ॥

आयाताय नृपाय पत्रमपरे चिक्रीडितारः पृथ-
ग्दत्त्वा स्वीयजयाख्यपत्रनिकराद्यन्निन्द्यदूराश्रयम्।
क्रीडन्त्यत्र नृपप्रयाणसमयादूर्ध्वं तु तन्मन्त्रिणे
दत्त्वाग्रे क्रमतः पृथग्पृथगमी क्रीडन्ति निन्दन्ति च ॥ ९ ॥

तत्र क्रमः—

एकतः क्रमगता जयकर्त्र्यश्चङ्गमोहरकुमाचवराताः।
उत्क्रमं दशयुताज्जयपत्रात्ताजरूपसमसेरगुलामाः ॥ १० ॥

नृपतिः प्रथमं ततोऽस्य मन्त्री क्रमतः खेलति सर्वदत्तपत्रैः।
इति तन्निजजातिपत्रयूथक्रमखेलोऽत्र मया विचार्य चोक्तः ॥ ११ ॥

भ्रमान्मन्त्री क्रीडितश्चेद्भूपात्प्रागेव भूपतिः।
तदानीं च त्वमायाति तथा सर्वत्र कल्पना ॥ १२ ॥

स्ववामगो यः स नरोत्तमः स्याद्दक्षे नरो हीनबलः स उक्तः।
नरोत्तमक्रीडनयोग्यकालात्स्वक्रीडनस्यावसरो यतोऽस्ति ॥ १३ ॥

नरोत्तमेनार्पितखेलपत्रे विधिर्यथोक्तः खलु खेलनस्य।
स हीनवीर्यार्पितखेलपत्रे पत्रद्वयस्यापि भवेत्कदाचित् ॥ १४ ॥

निजखेलमनुस्मरन्क्रमादुपपत्रेष्वखिलेषु दत्तदृक्।
मतिमान्सुविचार्य सर्वतोऽधिकजेता भवति स्वपत्रतः ॥ १५ ॥

स्वसंनिधौ यस्य नृपस्य मन्त्री परत्र भूपो यदि को विधिः स्यात्।
स मन्त्रिमर्त्येन नृपस्य ज्ञात्या पत्रं तदा निःसरणाय देयम् ॥ १६ ॥

पूर्वपत्रविनिःसृत्यैर्जितपत्रगणाद्बलम्।
ज्ञात्या नेयं यतस्तत्र त्यक्त्वा निन्द्यं दलं निजम् ॥ १७ ॥

एवं स्वपत्रादिमपत्रमेकं निष्कास्यतेऽत्र द्वितयं तथा न।
खेलक्रमादृष्ट दलानि यावदिहावशिष्यन्ति विधिस्तु तावत् ॥ १८ ॥

निष्कासने चेत्स्वसमीपपत्रमेकं तु तात्कालिकखेलयोग्यम्।
वर्तेत तर्ह्येवमसौ विधिः स्यान्नो चेत्तदा याचितपत्रदानम् ॥ १९ ॥

अत्रोदाहरणम्—

चक्रेश्वरायार्पितपत्रमेकं नवाङ्कितं यत्सविधेऽस्य भूपः ।
तस्योपपत्रेषु नवाङ्कपत्रादल्पानि यद्यादिदलात्क्रमेण ॥ २० ॥
स्युस्तर्हि तत्रान्तिममेकपत्रमादाय चक्रेश्वरयानमेव ।
देयं तदान्यद्दलमीश्वराय सर्वैः सदायं विधिरूहनीयः ॥ २१ ॥
चन्द्रादिभूपेष्वियमेव रीतिः परं तु पत्रे विधिरन्यथोक्तः ।
पञ्चाङ्कपत्रे तु षडङ्कपत्रं निष्कास्यते व्युत्क्रमतो यतोऽदः ॥ २२ ॥

अथ याचकस्वरूपम्—

शान्तो दान्तः प्रगल्भश्च गौरः कमललोचनः ।
संमुखो दक्षिणस्तश्च सोऽत्र याचक ईरितः ॥ २३ ॥

अथ दानविधिः—

सर्वाण्येकत्र पत्राणि कृत्वा तानि सुगोप्य च ।
संस्थाप्य याचकाग्रेऽपि याचयेति वदेत्ततः ॥ २४ ॥
अष्टाधिकदलेष्वाद्यमन्तिमं च न दीयते ।
यावत्संख्य याचकोक्तं विगणय्य तथा दलम् ॥ २५ ॥
त्यजेत्तस्याधिकारो यस्तेन पत्रं तु नीयते ।
चेदष्टाल्पदलानि स्युस्तदाद्यन्तेऽपि दीयताम् ॥ २६ ॥
याचनात्पत्रमायातं तत्र पत्रद्वयस्य न ।
खेलो भवेदितीदं तु जानन्त्येव मनीषिणः ॥ २७ ॥

अथोपसंहारः—

यावनी पावनी भाषा न हि चेन्नोच्यतामिति ।
गर्हितात्पङ्कतो जातं पङ्कजं कथमादृतम् ॥ २८ ॥
वदेन्नानृतमित्येषा श्रुतिस्तर्हि कथं नराः ।
वदन्ति व्यवहारार्थमसत्यं तद्वदत्र च ॥ २९ ॥
न दोषः सकले वाक्ये येनान्ते सुखमेधते ।
इति चेत्क्रीडनं तुष्टै किं नातोऽदः सुखावहम् ॥ ३० ॥

ज्योतिर्विच्छिवसूनुशंकरसुतो गीर्वाणसद्भाषया
चित्तालस्यनिवारणाय विदुषां बालैरपि प्रार्थिताम् ।
गञ्जीफाभिधखेलनक्रमविधेः पद्यामनिन्द्यामिमां
पद्यैः सद्गुणकाग्रणीर्गिरिधरः पूर्णां चकार स्फुटाम् ॥ २१ ॥

इति गञ्जीफाखेलनम् ।

तैलङ्गव्रजनाथविरचितं

मनोदूतम् ।

(सहृदयहृदयाह्लादनापरनामकम् ।)

सटीकम् ।[1]

ब्रह्मादिदेवतावृन्दवन्दनीयपदाम्बुजः ।
दूरीकरोतु हृदयजाड्यं मे नन्दनन्दनः ॥
जयन्ति श्रीगुरोः पादनखचन्द्रमरीचयः ।
यैर्निहत्य तमो गाढं स्वान्तं मे विशदीकृतम् ॥
स्वयं कृते मनोदूतकाव्ये भव्ये समासतः ।
व्याख्या बालावबोधाय क्रियते मञ्जुभाषिणी ॥
भूयोभूयः प्रणम्याहं याचे बद्धाञ्जलिर्बुधान् ।
बालभाषितमित्येव क्षमध्वं चापलं मम ॥

अथ 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥' इत्याद्युक्तं काव्यफलं पश्यन्सहृदयहृदयाह्लादकैरद्भुतकरुणशान्तरसप्रधानैः सहृदयानां भगवद्भक्तिरसिकानां मनसि सद्यः सहजानन्दसमुल्लासप्रवणं मनोदूताख्यं काव्यं चिकीर्षुस्तस्य निर्विघ्नसमाप्तये शिष्टाचारपरिप्राप्तं स्वेष्टदेवतास्मरणगर्भं वस्तुनिर्देशात्मकमाशीर्वादात्मकं च मङ्गलमुपनिबध्नाति—

दधद्वासः पीतं सजलजलदश्यामलरुचि-
र्मुदा पूर्णां कुर्वन्नधरसुधया सन्मुरलिकाम् ।

---

१. इदं हि सटीकं काव्यमनेन तैलङ्गव्रजनाथाभिधेयेन १८१४ (A. D. 1758) वैक्रमवत्सरे श्रीवृन्दाटव्यां निर्मितमिति ग्रन्थसमाप्तिश्लोकतोऽवगम्यते. पुस्तकं चास्य ग्रन्थस्यैकमेव २७ पत्रात्मकं राजगुरुवरश्रीदत्तभट्टानां सरस्वतीसदनत आसादितम्, अतस्तेषामुपकारं शिरसा निर्वहामः